# बाल भारती पब्लिक स्कूल

## प्राग्वार्षिक परीक्षा २०२३-२०२४ (उत्तर पत्रकम्)

## विषय-संस्कृतम् (११९)

## कक्षा-दशमी

**समयः घंटात्रयम्** **पूर्णांकाः – 80**

## (खण्ड-क) - अपठित अवबोधनम् (10 अंका:)

| | | |
|---|---|---|
| **प्रश्न १.** | **गद्यांशं पठित्वा प्रश्नान् उत्तरत-**<br>एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत् । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः । सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्- "सिद्धार्थ एषः मम हंसः । मया बाणेन निपातितः । अतः महयं देहि।" सिद्धार्थः दृढतया अवदत्- "अहं न दास्यामि अहम् अस्य रक्षकः अस्मि" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्- "यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति।" हंसः सिद्धार्थस्य समीपं गतवान् सत्यमिदम् भक्षकात्तु रक्षकः श्रेयान् । | |
| **(अ)** | **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i)<br>(ii)<br>(iii) | सिद्धार्थस्य<br>राजसभां<br>बाणेन | |
| **(आ)** | **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(2×2 =4)** |
| (i)<br>(ii)<br>(iii) | सिद्धार्थः हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्।<br>सिद्धार्थः दृढतया अवदत्- "अहं न दास्यामि अहम् अस्य रक्षकः अस्मि"।<br>भक्षकात्तु रक्षकः श्रेयान् । | |
| **(इ)** | **अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत ।**<br>परोपकार:, सिद्धार्थस्य परोपकारिता अथवा किमपि उपयुक्तं शीर्षकं | **(1×1 =1)** |

| (ई) | यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) | (1×3 =3) |
|---|---|---|
| (i) | अत्र अनुच्छेदे 'श्रुत्वा' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?<br>(ग) आकर्ण्य | |
| (ii) | अस्मिन् अनुच्छेदे 'रक्षकः' इति पदस्य किं विपर्ययपदं प्रयुक्तम्?<br>(ख) भक्षक: | |
| (iii) | 'राजकुमारः सिद्धार्थ:' अनयोः पदयोः विशेषणपदं किम्?<br>(ग) राजकुमारः | |
| (iv) | "अहं न दास्यामि अहम् अस्य रक्षकः अस्मि" इति पङ्क्तौ दास्यामि क्रियाया: कर्तृपदं किम्?<br>(क) अहम् | |

## (खण्ड-ख) -रचनात्मक-कार्यम् (15 अंका:)

| प्रश्न २. | विद्यालयस्य पर्यटनकार्यक्रमस्य अनुमतिहेतोः पितरं प्रति लिखितं पत्रं मञ्जूषायाः उचितपदैः पूरयत- | (0.5×10 =5) |
|---|---|---|
| | (i) **<u>छात्रावासतः</u>**<br>भुवनेश्वरम्<br>दिनाङ्कः<br><br>आदरणीय पितृपाद,<br>(ii) **<u>सादरं प्रणामाः</u>**<br><br>अत्र (iii) **<u>कुशलं वर्तते</u>** ।अग्रिममासे अस्माकं विद्यालयस्य छात्राः (iv) **<u>शैक्षिक-भ्रमणे</u>** 'चित्तौड़गढ़म् गमिष्यन्ति । अहम् अपि तै: सह गन्तुम् (v) **<u>इच्छामि</u>** । मम समीपे एतदर्थं (vi) **<u>पर्याप्तम्</u>** धनम् । (vii) **<u>अस्ति</u>** अतः(viii) **<u>भवदाज्ञाम्</u>** इच्छामि। कृपया शीघ्रम् (ix) **<u>अनुमतिम्</u>** ददातु भवान्।<br><br>भवदीय: सुत:,<br>(x) **<u>विकासः</u>** । | |
| | | |

| | | |
|---|---|---|
| **प्रश्न ३.** | **अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृते पञ्च-वाक्यानि लिखत-**<br>वाक्यरचनानुसारेण अंका: देया । | **(1×5=5)** |
| | **अथवा/OR,**<br>**'वृक्षाः अस्माकं मित्राणि' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यैः एकं अनुच्छेदं लिखत-**<br>वाक्यरचनानुसारेण अंका देया । | |
| **प्रश्न४.** | **अधोलिखितां कथां मञ्जूषायाः सहायता पूरयित्वा पुनः लिखत-** | **(0.5×10=5)** |
| | रामायणे इदं वर्णितं यत् एकदा जनकपुत्री सीता स्वस्य (i) ...... **<u>शृङ्गारकक्षे</u>**.......... शृङ्गारम् अकरोत्। सा षोडश-शृङ्गारं कृत्वा स्वशिरसि सौभाग्यचिह्नं सिन्दूरम् अरचयत्। एतद् दृष्ट्वा श्रीहनुमान् (ii) ...... **<u>सीताम्</u>**.......... अपृच्छत्-"मातः! भवती कथं (iii) .........**<u>प्रतिदिनम्</u>**....... स्वमस्तके सिन्दूरं रचयति।" माता सीता अवदत्-"प्रियवर! अनेन (iv) ......**<u>सिन्दूरेण</u>**.......... स्वामिनः आयुः (v) ......**<u>वर्धते</u>**...... सः प्रसीदति अपि। अतः अहम् एवं करोमि।" एतच्छ्रुत्वा हनुमान् ततः (vi) ......**<u>प्राचलत्</u>**...........। एकस्मिन् दिवसे श्रीहनुमान् सम्पूर्णे शरीरे (vii) ......... **<u>सिन्दूरम्</u>**....... विलेप्य राजसभाम् आगच्छत्। तदा तस्य रक्तवर्णं (viii) .........**<u>शरीरं</u>**....... दृष्ट्वा सर्वे जनाः अहसन्। कारणं पृष्टे सति हनुमान् अवदत्-"माता अवदत्-सिन्दूरेण स्वामिनः प्रसन्नता आयुश्च वर्धते, अतः अहमपि तेन कारणेन एव निजे (ix) ......**<u>सम्पूर्णे</u>**...... शरीरे सिन्दूरम् अलिम्पम्।" एतच्छ्रुत्वा (x) ......**<u>श्रीरामः</u>**... प्रसन्नः भूत्वा तस्य आलिङ्गनम् अकरोत्।<br>**अथवा,** | |
| | **रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** | **(1×5 =5)** |
| | **माता** - कनक ! किं करोषि त्वम् ?<br>**कनक** - (i) **<u>पाठं पठामि अम्ब!</u>** । | |

| | |
|---|---|
| | **माता** - दुग्धं पीतवान् ?<br>**कनक** - (ii) **<u>अम्ब! दुग्धं नैव पीतम्</u>**।<br>**माता** - तर्हि दुग्धं पीत्वा आपणं गच्छसि किम् ?<br>**कनक** - (iii) **<u>अम्ब! किम् आनयामि आपणात्</u>** ?<br>**माता** - आपणं गत्वा लवणं, शर्करा, तण्डुलान् गुडं, द्विदलं च आनय ।<br>**कनक** - (iv) **<u>तर्हि शीघ्रं धनं स्यूतं च ददातु</u>**!<br>**माता** - तत्र मंचे धनं स्यूतं च स्थापितम् अस्ति, ततः नीत्वा गच्छ ।<br>**कनक** - (iv) **<u>अस्तु ततः नयामि गच्छामि च</u>**! |

## (खण्ड-ग)-अनुप्रयुक्तव्याकरणम् (25 अंकाः)

| | | |
|---|---|---|
| **प्रश्न ५.** | **निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** | **(1×4 =4)** |
| (i) | कोशः+ अयम् | |
| (ii) | इन्द्रियाणि + आदौ | |
| (iii) | हानिः + ततः | |
| (iv) | चक्षुर्हीनः | |
| (v) | षडेते | |
| **प्रश्न ६.** | **निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कृत्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** | **(1×4=4)** |
| (i) | नास्ति "**<u>त्यागसमं</u>**" सुखम् ।<br>(क) त्यागेन समम् | |
| (ii) | "**<u>वनौषधीनाम्</u>**" तु अयं स्रोतः एव।<br>(घ) वनस्य औषधीनाम् | |
| (iii) | "**<u>अवक्रता</u>**" यथा चित्ते तथा वाचि भवेद् यदि।<br>(ख) न वक्रता | |

<table>
<tr><td>(iv)<br><br><br>(v)</td><td colspan="2">मयूर: "<u>साट्टहासं</u>" प्रविशति।<br>(ख) अट्टहासेन सह<br><br>बक: प्रविश्य स्वस्य "पक्षौ" अवधूय वदति।<br>(ग) पक्ष: च पक्ष: च</td></tr>
<tr><td>प्रश्न ७.</td><td>रेखांकितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)</td><td>(1×4=4)</td></tr>
<tr><td>(i)<br><br><br>(ii)<br><br><br>(iii)<br><br><br>(iv)<br><br><br>(v)</td><td colspan="2">संस्कृति: अपि विविधा "<u>मनोहरा</u>" च अस्ति।<br>(क) मनोहर + टाप्<br><br>पितास्य किं तपस्तेपे इत्युक्ति: तत् "<u>कृतज्ञता</u>" ।<br>(ग) कृतज्ञ + तल्<br><br>"<u>ज्ञानवान्</u>" श्रीकृष्ण: अर्जुनाय गीताम् उपदिष्टवान्।<br>(घ) ज्ञान + मतुप्<br><br>इजारायल देशे अवरुद्धा: अस्माकं देशस्य "<u>नगर+ठक्</u>" सुरक्षिताः भारतम् आनीता:<br>(ग) नागरिकाः<br><br>ईटा हि यस्यास्ति "<u>पुर+ङीप्</u>" प्रधाना।<br>(घ) पुरी</td></tr>
<tr><td>प्रश्न ८.</td><td>वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरियत्वा अधोलिखित संवादं पुनः लिखत- (केवलं प्रश्नत्रयम् )</td><td>(1×3 =3)</td></tr>
<tr><td>(i)<br>(ii)<br>(iii)<br><br>(iv)</td><td colspan="2">सुनील: - नरेन्द्र! त्वया अधुना किं ......<u>क्रियते</u>........?<br>नरेन्द्र: - .......<u>मया</u>..... तु सम्प्रति संस्कृतं पठ्यते।<br>सुनील: - किं त्वया संस्कृतलेखा: ......<u>पठ्यन्ते</u>......।<br>नरेन्द्र: - त्वं वद किं पठसि अधुना ?<br>मम गणितविषयस्य परीक्षा अस्ति अतः अहं तु .....<u>गणितं</u>......पठामि।</td></tr>
</table>

| | | |
|---|---|---|
| **प्रश्न ९.** | **भवतः विद्यालये श्लोकोच्चारण-प्रतियोगिता अस्ति । तत्र कः कार्यक्रमः कतिवादने च भविष्यति इति कोष्ठके दत्तं समयं संस्कृते रिक्तस्थानेषु लिखत-(केवलं प्रश्नत्रयम्)** | **(1×3 =3)** |
| (i)<br>(ii)<br>(iii)<br>(iv) | द्विवादने<br>सार्धत्रिवादने<br>सपादचतुर्वादने<br>पादोनपञ्चवादने | |
| **प्रश्न१०** | **मञ्जूषातः अव्ययपदानि चित्वा वाक्यानि पूरयत- (केवलं प्रश्नचतुष्टयम्)** | **(1×4=4)** |
| (i)<br>(ii)<br>(iii)<br>(iv)<br>(v) | .....**<u>अधुना</u>**........रमणीया हि सृष्टिरेषा जगत्पते।<br>न तावत् कलहेन ....**<u>वृथा</u>**..... समयं यापयेत।<br>अभ्यासेन तु कौन्तेय! वैराग्येण .. **<u>च</u>**... गृह्यते।<br>पाण्डवास्त्वं च राष्ट्रं च .. **<u>सदा</u>**.... संरक्ष्यमेव हि ।<br>पतितात् कलशात्... **<u>बहि:</u>**.... निर्गत्य विषधर: तमेव दुष्टबुद्धिं दष्टवान्। | |
| **प्रश्न११.** | **निम्नवाक्येषु रेखाङ्कितपदानां संशोधनं कृत्वा पुनर्लिखत- (केवलं प्रश्नत्रयम्)** | **(1×3 =3)** |
| (i)<br><br>(ii)<br><br>(iii)<br><br>(iv) | रे परभृत! अहं यदि तव सन्ततिं न "**<u>पालयति</u>**" तर्हि कुत्र स्युः पिका:,?<br>(क) पालयामि<br>"**<u>ध्यायान्</u>**" विषयान् पुंस: सङ्गस्तेषूपजायते।<br>(ग) ध्यायत:<br>अभ्यासेन तु कौन्तेय "**<u>वैराग्यं</u>**" च गृह्यते।<br>(ख) वैराग्येण<br>मेष: अन्यस्मिन् अहनि महानसं "**<u>प्रविशसि</u>**"।<br>(क) प्रविशति | |

## (खण्ड-घ) पठितावबोधनम् (30 अंका:)

| | | |
|---|---|---|
| प्रश्न १२. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत-**<br><br>अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म । कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः आकरयत् । तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत- सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म । | |
| **(अ)** | **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(0.5×2 =1)** |
| (i)<br>(ii)<br>(iii) | राज्ञः<br>प्रजाः<br>शिवीनां | |
| **(आ)** | **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i)<br>(ii)<br>(iii) | बोधिसत्त्वः बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्।<br>राजा नगरस्य समन्ततः दानशालाः आकारयत्।<br>राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म । | |
| **(इ)** | **भाषिक कार्यम् - (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i)<br><br><br>(ii)<br><br><br>(iii) | 'अर्थिनां समूहः अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् ।' इत्यत्र **<u>वस्तूनि</u>** इति पदस्य विशेषणपदम् किमस्ति?<br>(ख) अभीष्टानि<br>'राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म ।' इत्यत्र **'<u>यान्ति</u>'** इति क्रियापदस्य कः विपर्ययः प्रयुक्तः?<br>(घ) आयान्ति<br>**'<u>शिवीनां राजा बभूव।</u>'** अस्मिन् वाक्ये कर्तृपदं किम्?<br>(ख) राजा | |

| | | |
|---|---|---|
| **प्रश्न १३.** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत-**<br>शारदा शारदाम्भोजवदना वदनाम्बुजे ।<br>सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥<br>तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।<br>पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ | |
| **(अ)** | **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(0.5×2=1)** |
| (i)<br>(ii)<br>(iii) | अम्बुजेन<br>शारदा<br>इन्द्रियाणाम् | |
| **(आ)** | **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i)<br>(ii)<br>(iii) | शारदा अस्माकं सन्निधिं क्रियात् ।<br>श्रीकृष्णः अर्जुनं पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् इति उपदिशति ।<br>इन्द्रियाणां संयमः आदौ करणीयः । | |
| **(इ)** | **भाषिक कार्यम् - (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i) | सर्वदा शारदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् इत्यत्र **'<u>क्रियात्</u>'** इति क्रियायाः कर्तृपदं किम् ?<br>(घ) शारदा | |
| (ii) | "पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्" इति पङ्क्तौ **'<u>मारय</u>'** इति पदस्य पर्यायरूपे किं पदं प्रयुक्तम्?<br>(ग) प्रजहि | |
| (iii) | **'<u>सर्वदा</u>'** इत्यस्य विशेषणस्य किं विशेष्यं श्लोके लिखितम् ?<br>(क) शारदा | |

| | | |
|---|---|---|
| **प्रश्न १४.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत-**<br><br>**भीमः -** (युधिष्ठिरं प्रति) भ्रातः ! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।<br><br>**युधिष्ठिरः -** गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु। (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)<br><br>**श्रीकृष्णः -** भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।<br><br>**युधिष्ठिरः -** भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।<br><br>**श्रीकृष्णः** वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्। | |
| **(अ)** | **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(0.5×2 =1)** |
| (i)<br>(ii)<br>(iii) | भीमसेनः<br>भो धर्मराज! / वत्स!<br>द्रौणिं | |
| **(आ)** | **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** | **(1×2 =2)** |
| (i)<br>(ii)<br>(iii) | यदि ब्रह्मास्त्रं प्रयुज्यते तदा सर्वा पृथ्वी दग्धा स्यात्।<br>भीमस्य सारथिः नकुलः भवतु।<br>भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति। | |
| **(इ)** | **भाषिक कार्यम् - (केवलं प्रश्नद्वयम्)** | **(1×2=2)** |
| (i)<br><br><br>(ii)<br><br><br>(iii) | '**<u>अश्वत्थामानम्</u>**' अस्य किं पर्यायपदं संवादे प्रयुक्तम्?<br>(ख) द्रौणिम्<br>न जानाति भवान् द्रौणेः चपलां प्रकृतिम्, इति पङ्क्तौ '**<u>चपलां प्रकृतिम्</u>**' अनयोः किं विशेषणपदम्?<br>(ग) चपलाम्<br>'**<u>भीमः तं हन्तुम् अभिधावति</u>**' अत्र क्रियापदं किम्?<br>(ग) अभिधावति | |

| प्रश्न१५. | रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- | (1×5=5) |
|---|---|---|
| (i) | कौ | |
| (ii) | कीदृशी | |
| (iii) | कीदृशः | |
| (iv) | किम् | |
| (v) | केभ्यः | |
| (vi) | कानि | |

| प्रश्न १६. | अधोलिखितम् अन्वयं मञ्जूषायाः सहायतया पूरयत- | (0.5×4 =2) |
|---|---|---|

**ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥**

**अन्वयः** - (i) ........... **विषयान्**........ध्यायतः पुंसः तेषु (ii)........**सङ्गः**........... उपजायते। सङ्गात् (iii)........**कामः**........... सञ्जायते (iv)......... **कामात्**............ क्रोधः अभिजायते ।

**अथवा,**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**

**वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः ।**

**स केनापि प्रकारेण परैर्न परिभूयते ॥**

**भावार्थः** - यः मन्त्री वाचि (i).......**पटुः**............, धैर्ययुक्तः (ii)........ **सभामध्ये**......... निर्भीकश्च भवति, सः (iii)....... **अन्यैः**......... जनैः केनापि प्रकारेण (iv) ....... **तिरस्कारं**........ न प्राप्नोति ।

| प्रश्न १७. | रेखांकितपदानां प्रसङ्गानुसारम् अर्थं चिनुत- (केवलं प्रश्न चतुष्टयम्) | (1×4 =4) |
|---|---|---|
| (i) | "**विपुला**" च अत्र वनसम्पदा।<br><br>(ख) विशाला | |

| | |
|---|---|
| (ii) | "**<u>परुषां</u>**" वाचं न अभ्युदीरयेत्।<br><br>(ख) कठोराम् |
| (iii) | स विवेक: इति "**<u>ईरित</u>**:"।<br><br>(ख) कथित: |
| (iv) | आपदां "**<u>तरणि</u>**:" धैर्यम्।<br><br>(ग) नौका |
| (v) | वत्स न जानासि द्रौणे: चपलां "**<u>प्रकृतिम्</u>**"।<br><br>(ग) स्वभावम् |

| | | |
|---|---|---|
| **प्रश्न १८.** | **अधोलिखित-कथां रिक्तस्तानानि पूरयित्वा पुनः लिखत-** | **(0.5×8 =4)** |

कस्मिंश्चित् नगरे चन्द्रः नामकः एकः भूपतिः अवसत्। तस्य पुत्राः (i)......**<u>वानरक्रीडारताः</u>**........... प्रतिदिनं वानरसमूहं विविधैः (ii).......**<u>भोज्यपदार्थै:</u>**...........पुष्टं कुर्वन्ति स्म । तत्रैव राजगृहे (iii)...... **<u>बालवाहनयोग्यम्</u>**.......... मेषयूथमपि आसीत्। तस्य एकः मेषः (iv)....... **<u>जिह्वायाः</u>**............ लोलुपतावशात् दिवारात्रं महानसं प्रविश्य तत्र यद् (v)........ **<u>वस्तु</u>**......... पश्यति तदेव खादति । ततः पाचकाः यत्किञ्चित् काष्ठं मृण्मय-कास्यं (vi)......**<u>ताम्रपात्रम्</u>**........... वा पश्यन्ति, तेन एव शीघ्रं ताडयन्ति स्म । मेषस्य (vii)...... **<u>सूपकारणाम्</u>**...........च कलहं दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- “एतेषाम् कहलः वानराणाम् हिताय नास्ति ।" एवं चिन्तयित्वा सः सर्वान् (viii)....... **<u>वानरान्</u>**......... आहूय एकान्ते अवदत् ।